तर्कप्रतिबंधिकाविचारः प्रारभ्यते

त०प्र०
१

ओं श्रीगणेशायनमः ॥ तर्कस्त्वनुभवोपपत्तिरपरनामकोऽप्रमाप्रमासाधारणकारणमानसज्ञानयत्तिरापा
दयामितर्कयामीत्याघनुभवसिद्धोमानसत्वव्याप्योजातिविशेषः चाक्षुषत्वादिकमादायविनिग
मनाविरहः चक्षुरादिसन्निकर्षविरहदशायामपितर्कोदयात् अंधादीनामपितर्कोदयाच्च एव
मनुमितोपक्षसाध्यव्याप्यहेतुमतापरामर्शवत्तर्कंप्रत्यपिपक्षेआपाद्यव्याप्यापादकवतापरा
मर्शोहेतुः तत्कार्यकारणभावश्चानुमितिपरामर्शयोः कार्यकारणभाववदवधेयः एवमनुमि
तोपक्षविशेष्यकसाध्यनिश्चयरूपसिद्धिरिवतर्कोपिपक्षविशेष्यकआपाद्यनिश्चयरूपइष्ट
पत्तिर्दोषः अयंचविशेषोयदनुमितिंप्रतिअनुमित्सार्थिरूपविशिष्टतयायद्योक्तासिद्धिःसा
क्षादेवप्रतिबंधिका तर्कंप्रतिचोक्तरूपेणेष्टपत्तिर्नसाक्षात्प्रतिबंधिकाऽपितुतर्कंप्रतिपक्षवि
शेष्यकापाद्यासावनिश्चयरूपोबाधनिश्चयोतनकस्तस्यैवविघटकायथाऽपक्षतावच्छे
दकावच्छेदेनानुमितोपक्षतावच्छेदकावच्छेदकनत्वसामानाधिकरण्येनचबाधनिश्चयःप्र
तिबंधकःपक्षतावच्छेदकसामानाधिकरण्येनानुमितोपक्षतावच्छेदकावच्छेदेनबाधनि

श्चयएवप्रतिबंधकः।तयैवपक्षतावच्छेदकावच्छेदेनापत्तौपक्षतावच्छेदकावच्छेदेनतत्सामाना
धिकरण्येनचबाधनिश्चयोजनकःपक्षतावच्छेदकसामानाधिकरण्येनापत्तौचपक्षतावच्छेदका
वच्छेदेनापाधव्यतिरेकनिश्चयरूपबाधनिश्चयएवजनकः।अतएवपक्षतावच्छेदकावच्छेद
नापेक्षरूढयतायांअन्यतरासिद्धापत्तिर्नदोषायतत्सत्वेपिपक्षतावच्छेदकसामानाधिकरण्ये
नयोक्तनिश्चयोत्पत्त्याताद्दशापत्तिसमवात्।पक्षतावच्छेदकसामानाधिकरण्येनापत्तेरूढ
यतायांचान्यतरासिद्धापत्तिरपिकारणीभूतस्यपक्षतावच्छेदकावच्छेदेनयोक्तबाधनिश्चय
स्यविघटकतयादोषः।बाधनिश्चयस्यानाकांक्षितेषुबुद्धिसामान्यंप्रतिप्रतिबंधक
त्वेनतत्कस्यापाकांक्षयप्रत्यक्षरूपतयानतत्रतत्स्यजनकत्वमनुपपन्नं।नन्वनुमितौपरामर्शोपक्ष
धर्मतांशेऽप्रामाण्यग्रहादनुमित्यनुदयात्तत्रअप्रामाण्यग्रहाभावोऽपेक्षणीयः।तर्कप्रति
बंध्यप्रयोजकोपरामर्शानिष्ठाप्रामाण्यग्रहाभावस्यापेक्षितत्वेपिपक्षधर्मतांशेतन्निष्ठाप्रामा
ण्यग्रहाभावोनापेक्षितःतत्रतदंशेऽप्रामाण्यग्रहेपितत्कस्यानुमयसिद्धेतात्।अतएवा
पादकासिद्धिस्तत्कैरनुकूलाएवेतिमिश्राः।आपादकाभावबुद्धिरूपापादकासिद्धिर्नि

व्ययसत्वेपिगृहीताप्राप्यकार्यपरामर्शादव्याप्तिसंभवेनतन्निश्चयस्याप्रतिकूलत्वात्प्रतिकूलत्वनि
श्चयाविषयत्वमेवप्रसक्तमुक्तलक्षणमिति युक्तमिसर्वसिद्धपरिभाषातयापिसाक्षात्पक्षधर्मतांत्रोपरामर्शो
प्रामाण्यग्रहायतर्कंप्रत्यपेक्षितः। पक्षधर्मतांत्रोपरामर्शनिष्ठाप्रामाण्यग्रहस्तंप्रत्यपेक्षितानवेति
चेत्। अत्रसांप्रदायिकाः। पक्षधर्मतांत्रोपरामर्शनिष्ठाप्रामाण्यग्रहस्तंप्रत्यपेक्षित एवपक्षधर्मो
पस्थितिसाधनिश्चयेप्रमात्वनिर्णयेचातर्कानुसादस्यानुभवसिद्धत्वात्। अतएवस्याच्छेदेना
पादकमिलापः। तत्याचपक्षधर्मतांत्रोप्रमात्वग्रहविशिष्टपरामर्शत्वेनकांतंप्रतिकारणत्वं।
अथवाऽनुमितावप्रामाण्यग्रहाभावस्येवतुल्ययुक्त्यातत्रापिपक्षधर्मतांत्रोप्रमात्वग्रहस्यए
वकारणत्वं। पक्षधर्मतांत्रोप्रमात्वंचापादकाभावत्वापादकप्रकारकत्वरूपंप्रमात्वमापाद
कत्वापादकप्रकारकत्वरूपप्रमात्वाभावश्चान्यप्रामाण्यज्ञानानांप्रमात्वाभावप्रमात्वभेदे
नधर्मितावच्छेदकस्यचभेदनियन्तृतयायत्किंचिदप्रामाण्यग्रहविशिष्यस्यकारणतावच्छेदक
त्वातेविनापितदितरप्रमात्वग्रहविशिष्टपरामर्शात्कौत्स्न्यव्यभिचारः। यावदप्रमात्व
ग्रहाणांचैविशिष्यस्यकारणतावच्छेदकत्वेचात्संभवः। अथसमवायसंबंधावच्छिन्नाप्रमात्व

यहाभावकूटत्वावच्छिन्नप्रतियोगिताकाभावत्वेनाप्रामाण्यग्रहानुगतीकृत्यसामानाधिक
रण्यसंबंधेनपरामर्शविशेषणतयाकारणतावच्छेदकत्वमुपेयं।समवायसंबंधावच्छिन्नत्व
प्रमाण्यग्रहाभावविशेषणं।कूटत्वावच्छिन्नप्रतियोगिताकतदभावोविशेषणतयाविशेष
णयाघः।सत्यार्थेतिधर्मावच्छिन्नप्रतियोगिताकाभावोयत्किंचिदेकाप्रामाण्यग्रहस
त्त्वेववर्तेतइतिनव्यभिचारोनवाऽसंभवः।यत्रपरामर्शेप्रमात्वनिश्चयोऽप्रमत्वनिश्चयोपिव
र्तेततत्रापितर्कोत्पत्तिरेवाऽप्रमत्वग्रहसत्त्वेनैवतादृक्कूटाभावसत्वात्।अत्रचतज्ज्ञान
त्वादिविशेषधर्मावच्छिन्नविशेष्यताकाप्रामाण्यग्रहत्वेनैवाभावोनविशेषनवाज्ञानत्वादिसा नि
मान्यधर्मसामानाधिकरण्येनतत्तज्ज्ञानव्यक्तिधर्मिकाप्रामाण्यग्रहाणांज्ञानत्वादिसामा
न्यधर्मसामानाधिकरण्येनतद्धर्मितावच्छेदकाप्रामाण्यग्रहत्वेनाभावःतथासतितत्परामर्शो
व्यक्तिविशेषविशेषितज्ञायामपितत्परामर्शव्यक्तिरप्रमेत्यादितत्परामर्शव्यक्तिधर्मिका
प्रमात्वग्रहविशिष्टाग्रहीताप्रामाण्यकपरामर्शोत्तरात्तर्कोदयापत्तेःकिंनुतेषांतत्तद्व्य
क्तित्वादिनाज्ञानत्वादिसामान्यधर्मावच्छेदेनतद्धर्मितावच्छेदकाप्रमात्वग्रहाणां

चसामान्यतस्ताद्दशाप्रमात्वयुरुत्वेनैवाभावेनिर्विशेषःअतिप्रसंगोविरहात्। नचैवमपिपत्रादेःसुरक्ष्व्या
प्यदुःखवानभावःपरामर्शोःततस्तज्ज्ञानमप्रमेतितज्ज्ञानत्वधर्मितावच्छेदकाप्रमात्वस्यानंतौ
किप्रत्यक्षात्मकोबाधावतारःस्यात्येककालःततोऽभावःसुरक्ष्वान्स्यादितिनकोसतिःसुरक्ष्व्या
प्यदुःखवानभावइतिपरामर्शांतरंचेत्यकःकालःततोऽभावःसुरक्ष्वान्स्यादितिनकोसतिःप्रथमपराम
र्शांतरकोसत्यनुरोधेनतत्प्रमात्वयुरुव्यक्तेरभावस्यापिप्रतियोगिकोटावनिवेशनीयत्वा
त्। एवंयत्रादौसुरक्ष्व्याप्यदुःखवानभावइतिपरामर्शोसततस्तज्ज्ञानमप्रमेतितज्ज्ञानत्वधर्मि
तावच्छेदकाप्रामाण्यज्ञानंतौकिकप्रत्यक्षात्मकोबाधावतारःसुरक्ष्व्याप्यदुःखवानभावइ
तिपरामर्शांतरंचेत्यकःकालःततोऽभावःसुरक्ष्वान्स्यादितिनकोसतिः। तत्रतदनंतरमपि
द्वितीयपरामर्शांतरकोनरापतिरितिवाच्यं। ताद्दशस्यतंविशेषीयतत्रज्ञानत्वधर्मितावच्छे
दकाप्रमात्वयुरुणांस्वविषयीभूततत्परामर्शविशिष्टतयाऽभावस्यैवघटकत्वात्। नच
विशेष्यतासामानाधिकरण्येनाभावेनतादृक्प्रकारतासंबंधेनतादृक्प्रकारतावैशिष्ट्यमेवकारणतावच्छे
दकमुपेयतांकिंस्वविषयीभूततत्परामर्शवैशिष्ट्यनवेशेनेतिवाच्यं। तथासतिपत्रादेः

सुखव्याप्यदुःखवानभावइति परामर्शात्तत्तज्ज्ञानमप्रमेतत्ज्ञानत्वावच्छिन्नविशेष्यकाप्रमात्व
ज्ञानंतौकिकप्रत्यक्षात्मकोवाधावतारोनिरिंद्रियत्वाप्रमाऽप्रमाणइतिनिरिंद्रियायामप्रमायां
निर्घिताच्छेदकंकमप्रमात्वज्ञानंपरामर्शांतरंचेत्येकः कालःततोऽभावःसुखवान्स्यादिति
तर्कःनचतदनंतरमपिद्वितीयपरामर्शात्तत्कोतरापत्तिःप्रथमपरामर्शात्तत्कोसत्यनुरोधेनस
मूलावनात्मकतदप्रमात्वज्ञानव्यत्रेरभावस्यप्रतियोगिकोयंवक्ष्यनिवेशनीयत्वात्तत्रत्व
नत्वावच्छिन्नविशेष्यत्वसामानाधिकरण्येनयस्यवैशिष्यत्वेज्ञानत्वादिसामान्यधर्मावच्छेदन
तद्धर्मिताच्छेदकंकज्ञानांतरधर्मिकाप्रामाण्यस्यासंशयापत्तेःस्वविशेष्यतावच्छेदकाश्र
यत्वसामानाधिकरण्येनयस्यवैशिष्यत्वेज्ञानत्वादिसामानाधिकरण्येनज्ञानांतरध
र्मिकाप्रमात्वयुक्तस्यापिसंशयापत्तेरित्यनन्यगतिकत्वादुक्तेर्यगतिः एवंरूपयत्कारणत्वम्
तेपिताहशकूटत्वावच्छिन्नप्रतियोगिताकाभावत्वेनैवसमवायसंबंधेनहेतुत्वंपरामर्शो
स्यापिरूपयत्कारणतयाऽनपरामर्शविरुद्धायांताहशाभावमात्रात्तत्कोसत्तिरितिनका
प्यनुपपत्तिरितिचेन्न कूटत्वावच्छिन्नप्रतियोगिकाभावत्वस्यान्यतमत्वसमशीलतया

तत्कारणतानवच्छेदकत्वात्। अन्यथा बाधितव्याप्यनिश्चयानामपि पृथक्पृथक्प्रतिबंधकत्वविलोपापत्तिः। बाधितव्याप्यनिश्चयत्वावच्छिन्नाभावकूटत्वावच्छिन्नप्रतियोगिताकाभावत्वेनानुगतैकेनापि रूपेणतेषामप्रतिबंधकत्वस्यलाघवेनयुक्तत्वात्। एवं तुल्यावच्छेदकसंबंधेनपरामर्शानांपृथक्कारणत्वानुपपत्तिश्चततत्संबंधघटितपरामर्शत्वावच्छिन्नाभावकूटत्वावच्छिन्नप्रतियोगिताकाभावत्वेनानुगतैकेनापिरूपेणतेषामपिकारणत्वस्यसुवचत्वात्। किंचयथोक्तस्यतीयततत्त्वज्ञानत्वधर्मितावच्छेदकाप्रमात्वयत्नाणांस्वविषयीभूततत्परामर्शविशिष्टतयाऽभावस्यकूटघटकत्वेपरस्परविशेषणविशेष्यभावेदिनिगमकाभावेनपृथक्पृथक्कारणतापक्षेपिगुरुतरानंतकार्यकारणभावापत्तिरिति। एवंततदप्रमात्वयत्नविशिष्टपरामर्शत्वेनकारणतातततदप्रमात्वयत्नविशिष्टपरामर्शविशिष्टत्वेनकार्यतेतिरीत्याप्रामाण्ययत्नभेदेनपरामर्शापत्त्योः कार्यकारणभावभेदास्युपगमात्। अथचविशेषायत्तसामान्य[illegible]धर्मावच्छिन्नविशेष्यताकाप्रमात्वयत्नाणांवैशिष्ट्यंकेवलसमवायघटितसामानाधिकरण्येनतज्ज्ञानत्वादिविशेषधर्मावच्छिन्नविशेष्यता

काप्रामाण्यग्रहणांचवैशिष्ट्यंतज्ज्ञानत्वावच्छिन्नविषयतासमवायघटितसामानाधिकरण्योभयसंबंधेनाऽतो
पत्त्वादित्यादिनाप्रायुक्तातिप्रसंगस्यानयकारः।आपत्तिस्तुकार्यतावच्छेदकावच्छेदननिवेशनीया।तथा
सतिप्रायशः कार्यतत्त्वैकव्यक्तिभावरूपतयाताद्दशयत्किंचिद्विशिष्टपरामर्शाविरुद्दशायामपिघटादि
पसामान्यसामग्रीमुपादायतत्तत्सामान्यापत्तेस्तेनद्वारणासंभवात्।नचापत्तिलक्षणनिवेशतत्तद्प्रमात्वय
रूपविशिष्टपरामर्शाव्यवहितोत्तरोत्पन्नात्मघटसंयोगादिगुणेष्वव्याप्तिवारः।तेषांताद्दशपरामर्शान
धिकरण्यतेषुचयादिष्वप्तेरसंभवेनोक्तेरितिवाच्यं।सामानाधिकरण्यविशिष्टव्यवहि
तोत्तरत्वस्यकार्यतावच्छेदकादिशिपरामर्शस्यवैशिष्ट्यतयाव्यभिचारादिरूपताद्दशसंबंधेनपरामे
शीविशिष्टयत्किंचित्संयोगादेरात्मन्येवोत्पत्तेः।नचतत्तद्प्रमात्वयरूपविशिष्टपरामर्शत्वेनकार
णत्वेऽप्रमात्वयरूपपरामर्शयोर्विरोध्यविशेषणभावेवैनिगमनाविरहेणगुरुतरानंतकार्यकारणभा
वापत्तिःकारणतावच्छेदकावच्छेदस्यैवपूर्वसत्तायाकार्योत्पत्तिनियामकत्वेनयदाकदाचिद्प्रमा
त्वयरूपादायातिप्रसंगश्चेतिवाच्यं।अतएवदोषादप्रमात्वयरूपस्यपृथक्कारणत्वाभ्युपगमात्।का
र्यैकारणभावश्चतत्तद्प्रमात्वयरूपत्वेनतत्तद्प्रमात्वयरूपविशिष्टत्वेनवैशिष्ट्यंचसमानाधिकरण
त्वेसतिस्वाव्यवहितोत्तरत्वसंबंधेनपरामर्शादेःसामान्यकारणतयानपरामर्शादिविरुद्दशायां
तत्तद्प्रमात्वयरूपाभावात्कोत्पत्तिप्रसंगश्च।अयंचविशेषः यत्तज्ज्ञानत्वधर्मितावच्छेदकीभूतप्रमात्व

म
त०कु०
५

ग्रहणांततत्व्यक्तित्वेनैवकारणत्वंकार्यत्वंचिततत्व्यक्तिविशिष्टेननुतज्ज्ञानत्वधर्मितावच्छेदकप्रमा
त्वयत्वेनतथासतितत्तत्परामर्शैक्यरूपायामपितत्परामर्शव्यक्तिरप्रमातित्तानविशिष्टदण्डीता
प्रामाण्यकपरामर्शांतरोत्पत्तिकोत्पादापत्तेः कार्यतायानानाव्यक्तिरूपतासंपादनायत्वघुतरंतत
व्यक्तित्वेमपरोयगुरुतरस्यापितत्तव्यक्तिविशिष्टत्वस्यावच्छेदकत्वानुसरणं।विशेषस्तत्रैरन्यत्रापा
वाच्चनव्यभिचारः।नचैवमपिपत्राद्यविच्छादिनाप्रागुक्तातिप्रसंगोदुर्वारइतिवाच्यं।तादृशस्थल
विशेषीयाप्रमात्वयत्नव्यक्तिविशिष्टावच्छिन्नंप्रतिततद्विषयीभूतपरामर्शव्यक्तीनामपिविशि
ष्टहेतुत्वादित्युक्तेः।तस्मात्।अप्रमात्वयत्नव्यक्तीनांकारणतावच्छेदकत्वपक्षेऽप्रमात्वयत्नभेदे
नपरामर्शात्यंतगुरुतरानंतकार्यकारणभावप्रसंगात्।अप्रमात्वयत्नाणांपृथक्कारणत्वपक्षेऽ
व्यवहितोत्तरत्वस्यकार्यतावच्छेदकघटकतयास्थलविशेषेसर्वत्रतत्तदप्रमात्वयत्नविशिष्ट
त्वावच्छिन्नप्रतिततत्परामर्शव्यक्तेःपृथक्हेतुत्वस्यापरस्यैकतयामहागौरवापत्तेश्च।अप्रमात्व
यत्नव्यक्तीरप्युपेक्षितत्वेचस्युर्माणतकेप्रतिबंध्यप्रतिबंधकभावस्याप्रामाण्यग्रहभेदेनानं
तस्यापत्तेः।नन्वाप्तोपज्ञधर्मतांशेपरामर्शोनिष्ठाप्रमात्वयत्नमात्रकेप्रतिनापेक्षितः किंतुतत्तो
तन्निष्ठप्रमात्वनिश्चयापेक्षएवापेक्षितः।तथा-चानुमितिंप्रतिपरामर्शोनिष्ठाप्रामाण्य

ग्रहाभावयेनरूपेणोपयोगितापक्षधर्मतांशेपरामर्शेनिष्ठाप्रमात्वनिश्चयाभावस्यापितेनरूपे
णतर्कंप्रत्युपयोगितात्त्वतद्विचारावसरएवप्रपंचितं।प्रमात्वंचापादकाभाववत्तिआपादक
प्रकारकत्वरूपत्रमत्वाभावरूपमापादकवतिआपादकप्रकारकत्वरूपंयद्यार्थतंत्वयत्रप्र
मात्वयरोअप्रमात्वयरुभ्यनास्तितत्रापितर्कस्यतिरिष्टवेत्याहुः।इतितर्कतत्सामग्र्यो
स्वरूपनिर्वचनम्।सत्वतर्कःआपादकविशिष्टबुद्धौप्रतिबंधकः।प्रतिबध्यप्रतिबंध
कभावश्चतद्धर्मावछिन्नविशेष्यकतद्धर्मावछिन्नापादककापतित्वेनदोषविशे
षान्न्यानार्यतद्धर्मावछिन्नविशेष्यकतद्धर्मावछिन्नविशिष्टबुद्धित्वेनारू
पंयदिपरिमाणवत्स्यात्द्रव्यंस्यात्रत्यापतेःरूपंपरिमाणवत्तन्नवारत्या
दिसंशयवत्गुणःपरिमाणवान्नवारत्यादिसंशयेअपिप्रतिबंधकत्वा
रणायतद्धर्मावछिन्नविशेष्यकत्वक्षयं।तादृशापतेरूपंद्रव्यत्ववत्तन्नवा

इत्यादिसंशयप्रतिबंधकत्ववारणाय तद्धर्मावच्छिन्नापादकत्वमापत्तिविशेषणं। तद्धर्मावच्छिन्नापादकापत्तित्वं च स्वसमानाधिकरणत्वेसतिस्वाव्यवहितोत्तरत्वसंबंधेन तद्धर्मावच्छिन्नवत्तापरामर्शोविशिष्टत्वं। नन्वाद्यापाद्यभेदेनपरामर्शभेदात् एकस्यैव निर्वन्धित्वरूपापादकस्यविशिष्टबुद्धौनिर्धर्मत्वनिरालोकत्वाद्यापाद्यभेदेन अनंतप्रतिबध्यप्रतिबंधकभावापत्तिरितिवाच्यम्। इष्टत्वात्। तथाचपर्वतत्वावच्छिन्नविशेष्यकनिर्वन्धित्वविशिष्टबुद्धित्वेनप्रतिबध्यतावच्छेदकेपर्वतत्वावच्छिन्नविशेष्यकनिर्धर्मत्वव्याप्यनिर्वन्धित्वत्वावच्छि

न्नवतानिश्चयविशिष्टनिर्धूमत्वविधेयकापतित्वपर्वतत्वावच्छिन्नविशेष्यकनिरात्मोकत्वभ्रा
प्यनिर्वह्निकत्वावच्छिन्नवत्तानिश्चयविशिष्टनिरात्मोकत्वविधेयकापतित्वादिनाप्रतिबंधक
तेतिफलितं। निर्धूमत्वव्याप्यनिर्वह्निकत्ववान्गुणत्वव्याप्यरूपत्ववांश्चपर्वतइतिसमूहालंबन
परामर्शजन्यनिर्धूमत्वबाधविरहवन्नासर्वतोरूपवान्स्याद्गुणत्ववान्स्यादितिगुणत्वमात्रवि
धेयकस्यापतेकस्यतादृशनिश्चयविशिष्टतयानिर्वह्निकत्वविशिष्टबुद्धिप्रतिबंधकत्ववारणाय
विषयतानिर्धूमत्वादिविधेयकत्वमापतिविशेषणं। आपाद्यापादनैकस्यैवापादकस्यविशि
ष्टबुद्धौप्रतिबंधकताऽनंत्यस्यप्रागेवस्वीकृतत्वात्। तर्कतत्सामग्र्योःस्वरूपनिरूपणोत्तरीत्या
तद्धर्मावच्छिन्नयोःप्रामाण्यग्रहविशिष्टत्वेनप्रामाण्यग्रहाभावविशिष्टत्वेनवापरामर्शोवि
शेषणीयः। तेननिर्धूमत्वव्याप्यनिर्वह्निकत्ववान्निर्धूमत्वव्याप्यनिरिंधनत्ववांश्चपर्वतइति
समूहालंबनपरामर्शोनानिर्वह्नित्वांशेऽप्रामाण्यग्रहाभावविशिष्टत्वेननिरिंधनत्वांशेऽ
प्रामाण्यग्रहविशिष्टत्वेनजनितस्यनिर्धूमत्वविधेयकतत्कस्यनिरूपितसंबंधेननिर्वह्नि

लत्वावच्छिन्नवत्तापरामर्शविशिष्टेपिन[redacted]निर्वैत्वविशिष्टबुद्धावपि कि
प्रतिबंधकत्वप्रसंगः। रूपंयदिपरिमाणवत्स्यात्द्रव्यंस्यादित्यापत्तेः रूपंपरिणवन्नवेतिसंशय दिखा
व प्रतिबंधकत्वंवैद्रूपंमद्भिन्नवेतिसंशयेपिप्रतिबंधकत्वंवारणायतद्धर्मत्वंविशेषणंदेयं तत्पक्षायतद्धर्मावच्छि
न्नवत्तेतिपरामर्शविशेषणं। अथेवंद्रव्यत्वव्याप्यवद्रूपमित्यादिनिर्द्धर्मितावच्छेदकव्या
प्तिविषयतावच्छिन्नपरिमाणादिमत्तापरामर्शजन्यापत्तेरूपंपरिमाणवन्नवेत्यादिसंशयप्र
तिबंधकत्वंनस्यात्। परिमाणत्वावच्छिन्नवत्तापरामर्शजन्यत्वात्। नचतद्धर्मावच्छिन्नवत्तेति
विहायव्याप्तिविषयतानिरूपिततद्धर्मातिरिक्तधर्मानवच्छिन्नवत्तेतिवक्तव्यं। तथाचतद्धर्मा
वच्छिन्नव्याप्तिविषयतावच्छिन्नविशेष्यतातद्धर्मानवच्छिन्नव्याप्तिविषयितानिरूपितावच्छिन्नविशे
ष्यतान्यतरशालिनोरुभयोरेवपरामर्शयोः संयहइतिवाच्यं। तथासतिद्रव्यत्वव्याप्यवद्रूप
मितिनिर्धर्मितावच्छेदकव्याप्तिविषयतावच्छिन्नसंख्यादिमत्तापरामर्शजन्यापत्तेरपिरू
पंपरिमाणवेत्यादिसंशयप्रतिबंधकत्वापत्तेः। नचतद्धर्मातिरिक्तधर्मानवच्छिन्नतद्वृत्ती

तिवक्तव्यं। तथासतिपरिमाणत्वरूपेणसंख्यादिमत्त्वावगतिर्नाद्रव्यत्वव्याप्यपरिमाणवद्रूपमितिप
रिमाणत्वांशेऽनुमानेनपरामर्शोनजनितस्यैतत्कस्यपरिमाणसंशयप्रतिबंधकत्वायोगात्। स्यान्ना
गत्यातद्धर्मावच्छिन्नवत्तापरामर्शजन्यापत्तिर्निरवच्छिन्नतद्धर्मोभयवत्तापरामर्शजन्यापत्योर
एयोर्मणिमंत्रन्यायेनतद्धर्मावच्छिन्नविशिष्टबुद्धेःप्रतिबंधकत्वमुपेयं। निरवच्छिन्नत्वंचास्य
दृकारणतावच्छेदकघटकत्वादेवरूपांतरेणतद्धर्मोभयवत्तापरामर्शस्यनसंशयंप्रतिचाव्यंत
र यासतिनिर्वाच्छिन्नपरिमाणवत्तापरामर्शजन्यापत्तेः। परिमाणत्वगुणत्वसत्तायमेयत्वादि
निरखिलपरिमाणवृत्तिधर्मावच्छिन्नवत्तासंशयंप्रत्येवप्रतिबंधकतापत्तेरिष्टापत्तौचानुभव
विरोधात्। प्रतिबंधकत्वाद्यकल्पनेगौरवस्यदुरस्त्वाच्छेतिचेन्न। व्यासज्यधर्मितावच्छेद
ल कपरामर्शजन्यापत्तेरप्रतिबंधकत्वस्येष्टत्वात्। एवंनिर्धर्मितावच्छेदककविशिष्टबुद्धिवत्स्वरू
पतोजात्यादिप्रकारकबुद्धेरप्यापत्तिसामान्यप्रतिबध्यत्वस्येष्टत्वात्। प्रकारतावच्छेद
कघटितस्यप्रतिबध्यतावच्छेदकत्वेपिनदोषः। अतएवविपर्ययेपर्यवसायेवतर्कः सं
काप्रतिबंधकोनतूत्तरपर्यवसायीतिप्रामाणिकप्रवादः। यस्यापिचमतेनप

तावच्छेदकावच्छिन्नेआपादकाभावसाधनेयदवच्छिन्नाभावमात्रंसेहुर्मर्कति। सएवतर्कः
तद्धर्मावच्छिन्नशंकाप्रतिबंधकइतितदर्थः। शंकापदंविशिष्टज्ञानसामान्यस्यैवोपलक्ष
णं। संशयत्वस्यार्थेसमाजयस्तयापुरतयाचप्रतिबध्यतानवच्छेदकत्वात्। अतएवपर्व
तोयंनिर्वह्निःस्यान्निर्धूमःस्यादित्यादिविषयपरिशोधकतर्कस्यवाधनिश्चयप्रति
बंधकत्वद्वारानुमितावुपयोगः। अन्यथासाध्यसंदेहस्यानुमित्यप्रतिकूलतयातस्य
तत्रोपयोगित्वापत्तेः। नवतर्कस्यानिष्टप्रसजननरूपतयासाध्याभावजिज्ञासानिवर्तकद्वारासा
ध्यानुमितौविषयपरिशोधकस्यतर्कस्योपयोगइतिवाच्यं। साध्याभावापादकतर्कस्य
साध्याभावजिज्ञासानिवर्तकत्वेमानाभावात्। साध्याभावजिज्ञासायाःसाध्यानुमितिप्र
तिबंधकत्वेमानाभावात्। पटःपरिमाणवान्स्यात्द्रव्यंस्यादित्यापतरापाद्याभावेनापा
दकाभावसाधनेपिमहत्त्वाभावावच्छेदीर्घत्वाभावोभावतरपरिमाणाभावावच्छेद्यध
र्मसहकारिणमहत्त्वाभावावच्छिन्नाभावसिद्धिसंभवाद्धूमोमहान्नवेतिसंशयप्रतिबंध
कत्वापत्तिरतोमात्रपदोपादानं। एवंचदीर्घत्वावच्छिन्नाभावत्वावच्छिन्नाभावत्वेनापि

सिद्धिसंभवात्तस्याः ताहशसंशयप्रतिबंधकत्वं। नन्वेवं सामान्यं गुणाद्यन्यत्वविशिष्टसामान्यं वा
यदि गुणाद्यन्यत्वविशिष्टसत्तावत् स्याद्द्रव्यं स्यादित्यापत्तेः सामान्यं सत्तावन्नवेति संशयप्रति
बंधकत्वं न स्यात् तदापाद्याभावेन गुणान्यत्वविशिष्टसत्तारूपतदापादकाभावसाधनेगु
णान्यत्वनिश्चयरूपबाधसत्त्वात् व्यापकतानवच्छेदकसत्ताभावत्वरूपेण सिद्धिसंभवेऽपि तन्मा
त्रप्रकारेणैवसिध्यभावाव्यापकतावच्छेदकीभूतनविशिष्टाभावत्वेनापि सिद्धौ बाधकाभा
वादितिवाच्यं। इष्टत्वात्। तद्धर्मावच्छिन्नविरोध्यकतद्धर्मावच्छिन्नापादकाप्तेरेवतद्धर्मावच्छि
न्नविरोध्यकतद्धर्मावच्छिन्नविशिष्टबुद्धौप्रतिबंधकत्वात्। यत्तु। सामान्यं यदि गुणाद्यन्य
त्वविशिष्टसत्तावत् स्यात् द्रव्यं स्यादित्यापत्तेः सामान्यं सत्तावन्नवेति संशयाप्रतिबंधकत्वेपि
गुणाद्यन्यत्वविशिष्टसामान्यं यदि तद्विशिष्टसत्तावत् स्यात् द्रव्यं स्यादित्यापत्तिस्तादृश
संशयेप्रतिबंधिकाविशेषणविशेष्यतद्धर्मावच्छिन्नपक्षकविशिष्टापादकाप्तेर
पितद्धर्मावच्छिन्नविशेष्यकविशेष्यादिशिष्टबुद्धौप्रतिबंधकत्वात्। एवंसत्तावान् गु

णोयद्गुणाधन्यत्वविशिष्टसत्तावान्स्याद्द्रव्यंस्यादित्यापतिरपिगुणोगुणान्योनवेतिसं
शयेप्रतिबंधकविरोध्यविशिष्टतद्धर्मावच्छिन्नपक्षकविशिष्टपादकाकांक्षतेरपितद्ध
र्मावच्छिन्नविरोध्यकविरोषणाविशिष्टबुद्धीयकूप्रतिबंधकत्वात्नचैवंविपर्य्ययेवि
तद्धर्मावच्छिन्नभावत्वमात्रप्रकारकसिद्धिपर्य्यवसायिनएवतर्कस्यतद्धर्मावच्छिन्नकोटि
कशंकाप्रतिबंधकत्वमितिप्रामाणिकप्रवादव्याघातःबाधसहकाराव्यापकतानवच्छेद
कविरोध्याधर्मावत्वरूपेणसिद्धिसंभवेपितन्मात्रप्रकारेणसिध्यसंभवाव्यापकतावच्छे
दकीकृतेनापिविशिष्टाभावसिद्धौबाधकाभावादितिवाच्यं।बाधादितानस्यव्याप
कतानवच्छेदकप्रकारकानुमितिजनकत्वंचत्व्यापकतावच्छेदकप्रकारकानुमितौ
प्रतिबंधकत्वस्याप्युपगमेनतन्मात्रप्रकारकसिद्धिसंभवात्।नचैवंसामान्यंयद्गुणा
धत्वविशिष्टसत्तावत्स्याद्द्रव्यंस्यादित्यादिविरोषणाधविरोषितपक्षकविशिष्टा
पादकाकांक्षतेरपिसामान्यंसत्तावन्नवेतिसंशयप्रतिबंधकत्वापतिस्तत्रापिबाध
सहकारेणविरोध्याभावत्वमात्रविरोध्यादिकोटिकप्रकारकसिद्धिसंभ

वादितिवाच्यं । पक्षतावच्छेदकविशिष्टपक्षेआपाद्याभावेनापादकाभावसाधनेनियमत
स्तद्धर्मावच्छिन्नाभावत्वमात्रप्रकारकसिद्धिपर्यवसायिनएवतत्कस्यतद्धर्मावच्छिन्नकोटि
कसंशयप्रतिबंधकत्वात् । अत्रचबाधादिप्रतिसंधानस्यावश्यकतयासामान्यमिस्या ना
दिविशेषणान्यविशेषितपक्षकापत्तेरलयात्वात् । विशेषणादिविशेषितपक्षकेविशे
षणतावच्छेदकधर्मकतयाबाधप्रतिसंधानस्यावश्यकत्वादितिप्राचीनाःवदंति । तदसत् ।
बाधादिज्ञानस्यव्यापकतानवच्छेदकप्रकारकानुमितिजनकत्वव्यापकतावच्छेदकप्रका
रकानुमितिप्रतिबंधकत्वेसत्यकल्पनेविशिष्टपादकापत्तेरपिविशेष्यादिविशिष्ट
बुद्ध्याघातिरिक्तप्रतिबंधकत्वकल्पनेगौरवान्मानाभावाच्च । नचाप्रमात्वादिग्रहविशि
ष्टतद्धर्मावच्छिन्नवत्तापरामर्शएवतद्धर्मावच्छिन्नविशिष्टबुद्धेप्रतिबंधकोस्त्वाघ
वात्किमापत्तिप्रवेशेन । आपादिजनकपरामर्शेणाप्यापत्तिकालीनतादृशपरामर्शो
त्तरोत्पत्तौचाधकाभावघटनेरतस्यैवप्रतिबंधकत्वस्यसत्त्वादितिवाच्यं । तथासतीं

त० प्र०

१०

ऽपत्तिवशाच्चास्पृशादिसामग्रीप्रतिबंधकत्ववशाद्वा आपाद्यनुत्पादपितादृशानुकूलतर्कपरामर्शस्यतद्विशिष्टबुद्धिप्रतिबंधकत्वापत्तेरितिसमासः॥छ॥ तर्कप्रतिबंधकत्वे च चारःसमाप्तोयमग्रिमः॥छ॥ ॥छ॥ ॥छ॥ ॥शुभंभवतु॥ छ

स्वामिदीक्षित